BLUE PRINT & MODEL PAPERS OF SSC PUBLIC EXAMINATIONSFOR THE ACADEMIC YEAR 2025 – 26
BY THE DIRECTOR OF GOVERNMENT EXAMINATIONS (S.S.C. BOARD), A.P.,

**24S**

**SANSKRIT (MAIN LANAGUAGE)**

# संस्कृतम् (प्राच्योन्नतपाठशालानाम्)

## प्रारूपप्रश्नापत्रम् – 2 : 2025 – 26

(MODEL QUESTION PAPER – 2025 – 26 )

---

**समयः : 3.15 निमेषाः** **गरिष्ठाङ्काः : 100**

---

**छात्राणां सूचनाः :**

1. अस्मिन् प्रश्नपत्रे त्रयः विभागाः भवन्ति ।
2. प्रश्नपत्रपठनाय 15 निमेषाः , समाधानलेखनाय 3 घण्टाः समयः भवति।
3. प्रश्नानानां समाधानानि समाधानपत्रे एव लेखनीयानि ।
4. भाषांशाः इति विभागे विद्यमानानां प्रश्नानानां समाधानानि समाधानपत्रे **एकत्रैव** लेखनीयानि ।

---

## विभागः - I

**भावावगमनम् – प्रतिस्पन्दनम्**

1. **अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु।** $4 \times 2 = 8$

पितृवाक्यपरिपालकः श्रीरामः वनवासं कुर्वन् चित्रकूटे वसति स्म । रामम् अयोध्यां आनेतुं भरतः परिवारसहितः तत्र गतवान् । भरतं दृष्ट्वा श्रीरामः तं समीपम् उपावेश्य तस्य राज्यस्य चापि क्षेमं पृष्टवान्। तदङ्गतया अनेकान् राजनीति विषयान् अपि उपदिष्टवान्।

प्रश्नाः –

अ ) पितृवक्यपरिपालकः श्रीरामः वनवासं कुर्वन् कुत्र वसति स्म?

आ ) रामम् अयोध्यां आनेतुं कः परिवारसहितः तत्र गतवान्?

इ ) भरतं दृष्ट्वा श्रीरामः किं कृतवान् ?

ई ) रामः भरताय कान् विषयान् उपदिष्टवान् ?

2. **अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु।** 4 × 2 = 8

कश्चन व्याधः एकदा मृगयार्थं वनं गतवान् । बहुकालानन्तरं सः एकं वराहं दृष्टवान् । वराहं लक्ष्यीकृत्य सः बाणप्रयोगं कृतवान् । वराहस्य शरीरे महान् व्रणः जातः । व्रणितः वराहः कोपेन व्याधस्य उपरि आक्रमणं कृतवान् । तेन व्याधः मृतः । बाणप्रहारवेदनया वराहः अपि मृतः।

**प्रश्नाः**

अ) व्याधः किमर्थं वनं गतवान् ?

आ) व्याधः तत्र कं दृष्टवान् ?

इ) व्याधः कस्योपरि बाणप्रहारं कृतवान् ?

ई) कस्य शरीरे व्रणः जातः ?

3. **श्लोकं पूरयित्वा भावं लिखन्तु ।** 1 × 8 = 8

भारतदेशजातीयपताकस्य रूपकर्ता श्री पिंगलि वेंकय्य महोदयः । अयं क्रिष्णा जनपदे मुव्वयि मण्डलान्तर्गते भट्लपेनुमर्रु इति ग्रामे 1876 आगष्ट् 2 दिनाङ्के जातः।अस्य माता वेंकटरत्नम्मा ।पिता हनुमन्तरायुडु । सः प्राथमिकविद्यां पेदकल्लेपल्लि ग्रामे अभ्यस्तवान् । अयं 19 वयसि दक्षिणाप्रिकादेशे गान्धीमहोदयं मिलितवान् । अयं बोयर् इति युद्धे भागं गृहीतवान् । 1916 वर्षे लक्नो जातीयकांग्रेस्समावेशे जातीयपताकाविष्करणं कृतवान् ।

## विभागः – II

**भावव्यक्तीकरणं – सर्जनात्मकता**

**अधः दत्तानां प्रश्नानां समाधानानि 4 – 5 वाक्येषु लिखन्तु ।** 5 × 4 = 20

4) सन्मित्ररहितस्य जीवनं शून्यं किमर्थम् ?

5) चन्द्रापीडस्य विद्याभ्यासः पाठस्य कविमुद्दिश्य लिखन्तु ?

6) प्रियंवदा शकुन्तलायाः स्वगृहत्यागसमये प्रकृतेः अवस्थां कथं वर्णयति ?

**अधः दत्तानां प्रश्नानां समाधानानि 9 -10 वाक्येषु लिखन्तु ।** 2 × 8 = 16

7) हिरण्यकवृत्तान्तः कथाया- सारांशं स्वीयवाक्यैः लिखन्तु ?

अथवा

वर्तमानकाले प्राक-शास्त्रि () – शास्त्रि () – आचार्य () – वृत्तिशिक्षादीनाम् () अध्ययनार्थं परिकल्पितां छात्रप्रवेशपद्धतिं लिखन्तु ।

8) पतिगृहप्रापणसमये लोके सामान्यजनैः अनुभूयमानं दुःखं वर्णयन्तु ।

अथवा

समिष्टिकुटुम्बजीवने स्त्रीणां प्राधान्यम् उद्दिश्य दशवाक्यानि लिखन्तु ।

**अधः दत्तानां प्रश्नानां समाधानानि सर्जनात्मकतया लिखन्तु ।** $1 \times 8 = 8$

9) संकृतभाषा प्रचाराय एकं करपत्रं रचयन्तु।

अथवा

**संस्कृभाषायां अनुवदन्तु ।**

శ్రీకృష్ణుడు సుదాముడు బాల్యంలో ఒకే గురువు గారి వద్ద విద్యను నేర్చారు. వారిద్దరూ స్నేహం తో కలిసి మెలిసి తిరిగేవారు. గురువుగారికి సపర్యలు చేసేవారు. కాలక్రమంలో శ్రీకృష్ణుడు ద్వారకాధీశుడైనాడు . సుదాముడు ఎంత పేదరికం లో ఉన్నప్పటికీ ఎవరినీ యాచించక శ్రీకృష్ణుడుని తలచుకుంటూ ఉండేవాడు. భార్య సలహా మేరకు సుదాముడు శ్రీకృష్ణుడుని కలుసుకోవడానికి కొన్ని అటుకులను బహుమానంగా ఇచ్చాడు. దానికే సంతోషించిన శ్రీకృష్ణుడు సుదామునికి అష్టైశ్వర్యాలను ఇచ్చాడు .

10) वरदक्षिणानिर्मूलनाय पत्रिकायां सम्पादकीयं विरच्य प्रकाशयन्तु इति पत्रिकासम्पादकाय लेखं लिखन्तु।

अथवा

**संस्कृतभाषायाम् अनुवदन्तु।**

శ్రమ అనే పునాదిపైనే అభివృద్ధి భవనం ఆధారపడి ఉంటుంది. శ్రమించడానికి ఎవరూ సిగ్గుపడకూడదు. సోమరితనంతో సమాజానికి భారం కాకూడదు. శ్రమైకజీవనసౌందర్యాన్ని చూడగలగాలి. శ్రమను గౌరవంగా భావించడం నేర్చుకోవాలి. శ్రమసంస్కృతిలో జీవించడం నేర్చుకోవాలి.

## विभागः – III

**भाषांशाः –**

11 तः 19 पर्यन्तं निर्देशालुसारं लिखन्तु। 9 × 2 = 18

11) रामः विद्यालयं गच्छति । पाठं पठति। ( त्त्वा )

वाक्यद्वयं त्त्वा प्रत्यययोजनेन समुचितं संश्लिष्टवाक्यं चिन्वन्तु।

अ) रामः विद्यालयं गच्छन् पाठं पठति ।

आ) रामः विद्यालयम् आगत्य पाठं पाठति ।

इ) रामः विद्यालयं गत्वा पाठं पठति ।

ई) रामः विद्यालयं गतवान् पाठं पठति।

12) छात्राः आश्रमं प्राप्तवन्तः। छात्राः विश्रामं कृतवन्तः। ( ल्यप् )

वाक्यद्वयं ल्यप् प्रत्ययेन योजयित्वा सम्पूर्णं वाक्यं लिखन्तु।

13) नर्तकी नाट्यं करोति।

अस्य वाक्यस्य कर्मणिवाक्यं चिन्वन्तु

अ) नर्तक्या नाट्यं क्रियते। आ) नर्तकी नात्यं क्रियते

इ) नर्तक्या नाट्यं करोति । ई) नाट्येन नर्तकी करोति

14) सौचिकेन वस्त्रं सीव्यते।

कर्तरिवाक्ये परिवर्तयन्तु

15) नालन्दायां <u>विग्रह + आराधनम्</u> नासीत् ।

रेखाङ्कितपदौ संयुज्य सन्धिनाम च चिन्वन्तु

अ) विग्रहराधनम् , गुणसन्धिः आ) विग्रहराधनम् , सवर्णदीर्घसन्धिः

इ) विग्रहारधनम् , सवर्णदीर्घसन्धिः ई) विग्रहाराधनम् , गुणसन्धिः

16) अनन्तः <u>रत्नोदधिः</u> अस्माकं आनन्दं जनयति ।

रेखाङ्कितपदस्य सन्धिविच्छेदनपूर्वं सन्धिनाम च चिन्वन्तु

अ) रत्न + उदधिः , गुणसन्धिः आ) रत्न + ऊदधिः , वृद्धिसन्धिः

इ) रत्ना + उदधिः , गुणसन्धिः ई ) रत्ना + ऊदधिः ,सवर्णदीर्घसन्धिः

17) हे छात्र! फलानि <u>एक + एकं</u> गणयतु।

**रेखाङ्कितपदौ संयुज्य सन्धिनाम च लिखन्तु।**

18) रूपसंपन्नः वेङ्कटारवः सुशीलां परिणीतवान्।

**रेखाङ्कितपदस्य विग्रहवाक्यं, समासनामच चिन्वन्तु**

अ) रूपं च संपन्नः च , द्वन्द्वसमासः

आ) रूपे संपन्नः , सप्तमीतत्पुरुषसमासः

इ) रूपाय संपन्नः, चतुर्थीतत्पुरुषसमासः

ई) रूपेण संपन्नः, तृतीयातत्पुरुषसमासः

19) मानवेन आजीवनं <u>जपः दानञ्च</u> करणीयौ ।

**रेखाङ्कितपदयोः समस्तपदं , समासनाम च लिखन्तु।**

**20 तः 33 पर्यन्तम् प्रश्नानां निर्देशानुसारं लिखन्तु।** $14 \times 1 = 14$

20) शिशोः <u>वदनं</u> आनन्दं जनयति ।

**रेखाङ्कितपदस्य समानार्थकपदं चिन्वन्तु**

| | |
|---|---|
| अ) मुखम् | आ) वालम् |
| इ) वामहस्तम् | ई) वन्दनम् |

21) <u>तरवः</u> हि प्राणभूताः भूतले ।

**रेखाङ्कितपदस्य समानार्थकपदं चिन्वन्तु**

| | |
|---|---|
| अ) पत्राणि | आ) तपोवनानि |
| इ) कुसुमानि | ई) वृक्षाः |

22) <u>इन्दुः</u> कौमुदीं प्रसारयति ।

**रेखाङ्कितपदस्य समानार्थकपदं लिखन्तु**

23) परोपकाराय <u>पुण्यं</u> करणीयम् ।

**रेखाङ्कितपदस्य विरुद्धार्थकपदं चिन्वन्तु**

| | |
|---|---|
| अ) प्रशान्तम् | आ) पावनम् |
| इ) पापम् | ई) पनसम् |

24) कंससय <u>शत्रुः</u> कृष्णः ।

रेखाङ्कितपदस्य विरुद्धार्थकपदं चिन्वन्तु

अ) मित्रम्    आ) स्वसा

इ) सारथिः    ई) मातुलेयः

25) <u>पुरा</u> घण्टाकर्णः नाम राक्षसः आसीत् ।

रेखाङ्कितपदस्य विरुद्धार्थकपदं लिखन्तु

26) " **भिषक्** " इत्यस्य इतरवचने लिखन्तु ।

अ) भिषजौ – भिषजः    आ) भिषग्भ्याम् – भिषग्भ्यः

इ) भिषग्भ्याम् – भिषग्भिः    ई) भिषजोः – भिषजाम्

27) " **विदुषि** " इति पदस्य विभक्तिं लिखन्तु ।

अ) चतुर्थी    आ) सप्तमी

इ) पञ्चमी    ई) द्वितीया

28) " **येन** " इति पदस्य इतरवचने लिखन्तु ।

29) " **इच्छति** " इत्यस्य इतरवचने लिखन्तु ।

अ) इच्छतः – इच्छन्ति    आ) इच्छथः – इच्छथ

इ) इच्छवः – एषिष्यामः    ई) इच्छथः – इच्छन्ति

30) " **अमिलत्** " इति क्रियापदस्य वर्तमानकालरूपं लिखन्तु ।

अ) मिलति    आ) मेलिष्यति

आ) मिलतु    ई) मिलेत्

31) " **कथयिष्यति** " इति पदस्य इतरवचने लिखन्तु ।

32) " **मन्मथः** " इति पदस्य व्युत्पत्यर्थं चिन्वन्तु।

अ) माति वर्तते गर्भोऽत्र    आ) मनांसि मथ्नाति

इ) मनसि मुञ्चति    ई) मनुं मथयति

33) " **धरति विश्वम्** " इति व्युत्पत्यर्थस्य व्युत्पत्तिपदं लिखन्तु।